# BACHELOR OF ARTS EXAMINATION, 2025

## 1st Year, 2nd Semester

## SANSKRIT (HONOURS)

**Subject Code : ARTS/SANS/UG/SEC/12/102**

## [ LEARNING SANSKRIT : A DIRECT APPROACH ]

**Time : Two Hours** **Full Marks : 30**

***The figure in the margine indicate full marks.***

द्वितीयं प्रश्नं विहाय सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः -

CO – 1

१. अधोनिर्दिष्टेषु द्वयोः सुरगिरा देवनागर्या लिप्या च भाषान्तरं कार्यम् –

2.5 × 2 = 5

(i) Good books are store house of knowledge and wisdom. Anyone who has the key can enter these store house and help himself.

(ii) Narendranath had a melodious voice. He saw sri Ramakrishna first at the residence of Sures Mitra. There, when requested, he sang a devotional song before Paramahansa.

(iii) Honesty is a great virtue. If you do not deceive others, if you do not tell a lie, if you are strictly just and fair in your dealings with others, you are an honest man.

२. अधोनिर्दिष्टेषु द्वयोः स्वभाषया भाषान्तरं कार्यम् –

2.5 × 2 = 5

(क) इदानीं प्रभुः श्रीरामकृष्णो भक्तैः सह प्रकोष्ठस्य उत्तरपूर्वालिन्दम् आगतः। भक्तेषु दक्षिणेश्वरवासी कश्चन गृहस्थः अपि उपविष्टः। स्वगृहे स वेदान्तचर्चां करोति।

श्रीरामकृष्णस्य पुरोभागे श्रीयुक्तकेदारचट्टोपाध्यायेन सह शब्दब्रह्मविषये स चर्चां कुर्वन् अस्ति।

(ख) अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति। अहं तु शीतले जले बहुकालपर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञ इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि, योजनां निर्मीय च स्वसभायां विविधपदमलंकुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यामि, अतः अहमेव वनराजपदप्राप्तये योग्यः।

(ग) अहो अनुपमं भाति, मोहनी मूर्तिः, भक्तहृदयरञ्जनः।

नवरागेण रञ्जितः, कोटिशशिविनिन्दितः,

कीदृशी दामिनी चकास्ति तद्रूपालोकात्पुलकेन शिहरितं भवति जीवनम्।

हृदि कमलासने भावय तच्चरणम्,

पश्य शान्तमनसा, प्रेमचक्षुषा, अपरूपं प्रियदर्शनम्।

CO – 2

३. अनुच्छेदं पठित्वा अधोलिखितानां प्रश्नानामुत्तराणि सुरगिरा दीयन्ताम् -

1 × 5 = 5

अथ गदाधरः पठितुमारेभे। अध्यापकस्तम् 'अ इ उ ण्' इत्यारभ्य 'हल्' इत्यन्त पाठयामास।

गदाधरः ब्रूते – 'किमेतत्'?

अध्यापकः – एतानि चतुर्दश शिवसूत्राणि।

गदाधरः – केन कृतानि?

अध्यापकः – नृत्तावसाने नटराजो नवपञ्चवारान् ढक्कां ननाद। तत एतानि उत्पन्नानि। (गृहम् गत्वा गदाधरः ढक्कामेकामादाय लगुडेन ताडयति। न तु 'अ इ उ ण्' इत्यादि प्राप। आगतश्च अध्यापकसविधम्)

गदाधरः – भोः, सर्वमवदातम्।

अध्यापकः – हुँ।

गदाधरः – 'अ इ उ ण्' इत्यादि ढक्कानिनादादुत्थितमिति यदुक्तं तन्मिथ्या।

अध्यापकः – कथमुपलब्धम्?

गदाधरः – मया वारं वारं ढक्का लगुडेन ताडिता, प्रतिवारमेव ढक्शब्द उत्पन्नः। न तु सकृदपि 'अ इ उ ण्' इति।

(क) गदाधरः किमपठत्?

(ख) कुतः शिवसूत्राणि उत्पन्नानि इति अध्यापकेन उक्तम्?

(ग) गृहं गत्वा गदाधरः किमकरोत्?

(घ) अध्यापकसविधमागत्य सः किमवदत्?

(ङ) स्वमतस्थापनार्थं तेन किम् कारणमुपस्थापितम्?

CO – 3

४. अधोनिर्दिष्टयोः यथेच्छ**मेकमा**श्रित्य दशवाक्येषु संलापो विरच्यताम् - 5

(क) अध्ययनेन साकं क्रीडाया आवश्यकताविषये शिक्षकछात्रयोः संलापो लिख्यताम्।

(ख) एकः शिक्षार्थी नृत्यमधिगन्तुं नृत्यशालां गच्छति। तत्र प्रशिक्षकेण सह तस्य वार्तालापो विरच्यताम्।

**CO – 4**

५. निम्नलिखितेषु यथेच्छ**मेकमा**श्रित्य अनधिकपञ्चदशवाक्येषु अनुच्छेदो विरच्यताम्। 5

(क) जातीयसंहतौ संस्कृतस्य भूमिका।

(ख) काचिद् भ्रमणकथा।

(ग) विद्या ददाति विनयम्।

६. अधोलिखितयोः ज्ञानवर्धकवाक्ययोः यथेच्छ**मेकमा**श्रित्य काचिद् लघुकथा लेखनीया - 5

(क) दुराशा खलु दुःखकारणम्।

(ख) पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारकः।

*****